IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 5, December 2025
Impact Factor: 7.67

# श्रीमद्भगवद्गीतायां शिक्षाविचार:

**तीजराम वर्मा**

शोधच्छात्र: संस्कृत विभागः, पौडी परिसर:

हेमवती नन्दन बहुगुणा गढवाल, विश्वविद्यालय, श्रीनगरं, गढवाल, उत्तराखण्ड

atirtharamji@gmail.com

**विषयसारः-**

श्रीमद्भगवद्गीता वस्तुतो महाभारतस्यैवांश:परं महत्त्वात् पृथक्रूपेण प्रसिद्धम्। महाभारते भीष्मपर्वणि पञ्चविंशतितमादध्यायाद् (२५) द्वाचत्वारिंशत्तमाध्याय: **श्रीमद्भगवद्गीता** इति नाम्ना प्रसिद्धम् । अस्यां गीतायां सप्तशती (७००) श्लोकाःसन्ति। तेषु श्लोकेषु चतुस्सप्तत्युत्तरं पञ्च शतं (५७४) श्लोका भगवत: श्रीकृष्णस्योपदेशरूपेण, चतुरशीति: (८४) श्लोका अर्जुनस्य प्रश्नरूपेण, संजयस्य एकचत्वारिंशत् श्लोकाःसन्ति। एकः श्लोक: धृतराष्ट्रमुखेन विद्यते। अष्टादशस्वध्यायेषु नवानामध्यायानां प्रथमस्य श्लोकस्य वक्ता श्रीभगवान् । सङ्ख्यादृष्ट्या नवाङ्कःपूर्णसङ्ख्या अर्थात् भगवतो वचनं पूर्णं भवति न तत्र किञ्चिदपि न्यूनता। अर्जुनःसप्तानामध्यायानां प्रथमस्य श्लोकस्य वक्ता। शिक्षणविधौ शिष्यस्य छात्रस्य वा प्रश्ना अधिकाधिकं स्युः। सद्गुणानां ग्रहणं शिक्षा। शिक्षाया उद्देश्यं भवति - **मुक्तिः**। गुरोः शिक्षकस्य वा मुख्यं कार्यं यद् स शिष्यस्य छात्रस्य वा प्रथमं समस्यां शृणुयाद्। शिक्षायाःसाफल्यं एतदेव भवति यद् शिष्यश्छात्रो वा गुरुवचनं कर्त्तुम् उद्यतो भवेत् यतो हि गुरुवचनपालने एव शिष्याणां छात्राणां वा कल्याणं वर्तते।

**सङ्केत शब्दः-** श्रीमद्भगवद्गीता, शिक्षा, कर्मयोगः, ज्ञानम्, मुक्तिः।

**'शिक्षा'** मानवजीवनस्य दृढं स्थायि चावलम्बनमस्ति। शिक्षा जनानां कृते तु परमावश्यकमस्त्येव, राष्ट्रस्य सुदृढार्थमपि परमावश्यकं यतो हि राष्ट्रस्य निर्माणो जनानां सुदृढ आधारे भवति। जनानां शिक्षा राष्ट्रस्य हितसाधिका भवन्ति। जीवने शिक्षाया महत्त्वं सर्वैःस्वीक्रियते।

**शिक्षा** इत्ययं शब्दः 'शिक्ष विद्योपादाने' धातोः अप्रत्यये पश्चात् टाप्प्रत्यये कृते निष्पद्यते । शिक्षा शब्दस्य शाब्दिको अर्थो विद्याग्रहणं, विद्याध्ययनं, ज्ञानार्जनं भवति परं भावार्थो व्यापको भवति । सद्गुणानां ग्रहणं शिक्षैव।

शिक्षाया लक्ष्यमुद्देश्यं वा किं भवति ? शिक्षाया उद्देश्यं भवति - **मुक्तिः**। केभ्यो मुक्ति:? संशयान्मुक्तिः,अज्ञानान्मुक्तिः, पापकर्मणो मुक्तिः,दुराग्रहान्मुक्तिः, कृत्रिमावश्यकताया मुक्ति:। संक्षेपेण वक्तुं शक्यते मनुष्यस्य विवेकजागरणं शिक्षायाः मुख्यमुद्देश्यं येन स प्रत्येकं विषये स्वयमेव किं कर्त्तव्यं किमकर्त्तव्यमिति निर्णेतुं समर्थःस्यात्।

शिक्षाया मुख्यत्वेन त्रय:स्कन्धा:सन्ति –

1.शिक्षा अथवा विषयवस्तु।

2. शिक्षकःअथवा गुरुः।

3. छात्र: अथवा शिष्यः।

आलेखेऽस्मिन् श्रीमद्भगवद्गीताया अध्यायानां यःप्रथम: प्रथमःश्लोको वर्तते तेषामन्तिमस्याध्यायस्यान्तिमानां च श्लोकानां विश्लेषणपूर्वकं शिक्षाविचारःकरिष्यते- सर्वविदितं यत् श्रीमद्भगवद्गीतायां सप्तशती श्लोकाःसन्ति। इयं गीता मुख्यत्वेन कृष्णार्जुनयो:संवादो वर्तते। सर्वप्रथमं ध्यातव्यमेतदस्ति यद् अर्जुन:कृष्णस्य सखारूपेण तु परिचितोऽस्ति परन्तु गुरुणा, योगेश्वरेण श्रीकृष्णेनानभिज्ञोऽस्ति परन्तु अर्जुनस्य समर्पणं कृष्णं प्रति पूर्णमस्ति। अत्र शिक्षाऽऽस्ति यदि सखा कृष्णेन सदृशो भवेत् तर्हि तत्र समर्पणं स्यात्। सामान्यरूपेण एवं न भवति, यदि कोऽपि ज्ञानेन योग्यतया वा गुरुर्भवति तदपि तस्य परिचिता, मित्राणि कथयन्ति इमं बाल्यकालाद् जानामि, एषोऽस्मान् किं शिक्षयिष्यति।

अधुना प्रथमस्याध्यायस्य प्रथमं श्लोकं पश्याम: -

**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।**
**मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥**[1]

अस्य प्रथमस्य श्लोकस्य वक्ता धृतराष्ट्रः। श्लोकस्य द्वे पदे विशेषरूपेण ध्यातव्ये -मामकाः, पाण्डवाः। यद्यपि सर्वे कुरुवंशिनस्तथापि धृतराष्ट्रो भेदबुद्धिं कृत्वा वदति मामका:पाण्डवाश्चैव। एषा भेदबुद्धिरेव युद्धस्य कारणं। यस्मिन्नपि राष्ट्रे भेदबुद्धयो जना भविष्यन्ति तत्र युद्धं भविष्यति।धृतराष्ट्रं भेदबुद्धीनां प्रतिनिधिं मन्तुं शक्यते। भेदबुद्धिःकदापि न कर्त्तव्या तस्माद् एकत्रोक्तम् -

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥**

द्वितीयस्याध्यायस्य प्रथमं श्लोकमालोचयाम: -

**तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।**
**विषीदन्तमिदं वाक्यमुवाच मधुसूदनः॥**[2]

अस्य श्लोकस्य वक्ता सञ्जयः। सञ्जयःकः? सञ्जय:साक्षी। सञ्जयो यद् पश्यति तद् श्रावयति। दृश्यं शुभमशुभं वा भवेत् परन्तु तेन सर्वं द्रष्टव्यमस्ति यतो हि स कर्त्तव्येणानुबद्धः। प्रथमेऽध्याये भगवतो श्रीकृष्णस्य मुखात् एकोऽपि श्लोको नास्ति, सोऽर्जुनं केवलं श्रृणोति, द्वितीयेऽध्याये तदा वदति यदा शिष्य:व्याकुलो भवति, अनेन ज्ञापितो भवति गुरोः शिक्षकस्य वा मुख्यं कार्यं यद् स शिष्यस्य छात्रस्य वा समस्यां प्रथमं श्रृणुयाद्।

तृतीयस्याध्यायस्य प्रथमं श्लोकं पश्याम: -

**ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।**
**तत्किं कर्मणि घोरे मां नियोजयसि केशव॥**[3]

---

[1] ०१/०१ श्रीमद्भगवद्गीता

[2] ०२/०१ श्रीमद्भगवद्गीता

[3] ०३/०१ तत्रैव

अस्य श्लोकस्य वक्ता अर्जुनः। यदि ज्ञानं गुरुतरं मन्यसे तर्हि मां किमर्थं पापकर्मणि युद्धे नियोजयसि । पूर्वस्मिन्नध्याये यद्यपि भगवता श्रीकृष्णेन अनेकैः श्लोकै: कर्मार्थं प्रेरितः, यथा **मा ते सङ्गोऽस्त्वकर्मणि, योगस्थः कुरु कर्माणि**, **ततो युद्धाय युज्यस्व** पुनरप्यर्जुन:कथयति यत् **कर्मणो बुद्धि:ज्यायसी।** संशययुक्तस्यैवमेव बुद्धिर्भवति।

चतुर्थमध्यायं पश्यामः -

**इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।**

**विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्॥**[4]

अस्य श्लोकस्य वक्ता श्रीभगवान् । अत्र भगवान् योगपरम्परां वर्णयति । योगस्य प्रथमो वक्ता श्रीभगवान्, तत्पश्चात् वैवस्वतो मनुः, तत्पश्चात् इक्ष्वाकुः। कालवशात् नष्टस्य तस्य योगस्य पुनर्वक्ता श्रीभगवान्। परम्परावर्णनेन श्रीभगवान् शिक्षयति यत् गुरोःशिक्षकाणां वा कर्त्तव्यमस्ति ते स्वशिष्यान् स्वनिष्ठान्, व्यक्तिनिष्ठान् न कारयेयुः परन्तु परम्परानिष्ठान् कारयेयुः।

पञ्चमस्याध्यायस्य प्रथमं श्लोकं पश्यामः -

**सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।**

**यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥**[5]

अस्य श्लोकस्य वक्ता अर्जुनः। अर्जुन:कर्मयोगं ज्ञानयोगञ्च भिन्नं मत्वा वदति श्रेयस्करमेकं ब्रूहि। एतादृशःप्रश्न उभयोस्तत्त्वमजानतो भवति। विद्वद्वर्गेषु एतादृशःप्रश्नःप्रचलति यत् कर्मयोगःश्रेयः, ज्ञानयोगःश्रेयः। विद्वत्सु विवादस्य कारणोऽप्येतादृशःप्रश्नो भवति। विद्वद्भि भगवतो वचनं ध्यातव्यम् -

**साङ्ख्ययोगौ पृथग्बाला:प्रवदन्ति न पण्डिता:।**[6]

**सन्न्यास:कर्मयोगश्च निःश्रेयसकरावुभौ ।**[7]

षष्ठस्याध्यायस्य प्रथमःश्लोक:श्रीभगवतः। श्रीभगवानुवाच कर्मफलमनाश्रित्य य:कर्म करोति स ज्ञानयोगी स एव कर्मयोगी। यद्यपि पूर्वस्मिन्नध्याये एष विषय उक्त:पुनरपि श्रीभगवान् वाक्यान्तरेणोक्त्वा बुद्धिं दृढीकरोति। अनेन ज्ञायते केवलं शिक्षणं पर्याप्तं नास्ति तस्य पुनरावृत्तिर्दृढीकरणमप्यावश्यकम्।

**अनाश्रित:कर्मफलं कार्यं कर्म करोति यः।**

**स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः॥**[8]

सप्तमस्याध्यायस्य प्रथमे श्लोके श्रीभगवान् पुनरुवाच -

**मय्यासक्तमना:पार्थ योगं युञ्जन्मदाश्रय:।**

**असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥**[9]

---

4 ०४/०१ तत्रैव

5 ०५/०१ तत्रैव

6 ०५/०४ पूर्वार्धः तत्रैव

7 ५/०२ पूर्वार्धः तत्रैव

8 ०६/०१ तत्रैव


DOI: 10.48175/IJARSCT-30649

श्रीभगवान् उवाच पार्थ त्वं मयि युक्तचित्तः, मामाश्रित्य योगे लग्नस्तस्माद् येन विधिना समग्ररूपेण मां ज्ञास्यसि तद् वदामि। अस्मिन् श्लोके वार्त्ताद्वयं मुख्यं वर्तते - मय्यासक्तमनाः, मदाश्रयो योगं युञ्जन्। शिष्यश्छात्रो वा तदैव समग्ररूपेण जानाति यदा स गुर्वासक्तमना भवति, स कर्म तु करोत्येव परं भगवदाश्रयो, गुर्वाश्रयोऽपि भवति।

अष्टमस्याध्यायस्य प्रथमं श्लोकमालोचयामः -

**किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।**

**अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते॥**[10]

अस्य श्लोकस्य वक्ता अर्जुनः। अस्मिन् श्लोके पृष्टाःप्रश्ना दार्शनिकाः प्रश्नाः वस्तुतो दार्शनिकप्रश्नानां वर्तमानेन समस्यया सह साक्षाद्रूपेण सम्बन्धो न दृश्यते परं वर्तमानकाल आगता समस्या कस्यचित् दार्शनिकविषयस्य मिथ्याज्ञानादेव भवति।

नवमस्याध्यायस्य प्रथमे श्लोके श्रीभगवान् उवाच -

**इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।**

**ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥**[11]

भगवान् श्रीकृष्णःकथयति तुभ्यं दोषदृष्टिरहिताय गोपनीयं ज्ञानं प्रवक्ष्यामि। कानिचिद् ज्ञानानि सर्वे ज्ञातुं शक्नुवन्ति परं कानिचिद् ज्ञानानि न ज्ञातुं शक्नुवन्ति सुक्ष्मत्वात्तस्माद् भगवता उक्तम् - **अनसूयवे।** शिक्षाया व्यवस्था एतादृशी स्यात् यत्र यो यस्य विषयस्याधिकारी तमेव तद्विषयं शिक्षयेत् नानधिकारिणे तेन गुरोःशिक्षकस्य वा कालस्य शक्तेश्च सदुपयोगो भविष्यति। दशमस्याध्यायस्य प्रथमं श्लोकं पश्यामः -

**भूय एव महाबाहो शृणु मे परमं वचः।**

**यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥**[12]

अस्य श्लोकस्य वक्ता श्रीभगवान्। श्रीभगवानुवाच भूयःशृणु, हितकाम्यया वक्ष्यामि, ते प्रीयमाणाय । अत्र श्रीभगवान् शिक्षयति ये गुरुं शिक्षकं वा प्रीयमाणाःशिष्याश्छात्रा वा सन्ति तेषां कृते भूयो वक्तव्यं भवति।

एकादशस्याध्यायस्य प्रथमःश्लोकोऽर्जुनस्य -

**मदनुग्रहाय परमं गुह्यमध्यात्मसञ्ज्ञितम्।**

**यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥**[13]

एतावतां प्रश्नानां पश्चात् अर्जुनः प्रथमं वारं एतादृशं वचनमुवाच - **मम मोहो विगतः**। शिक्षायाः,गुरोः, शिक्षकस्य वा एतद्देवोद्देश्यं शिष्यस्य छात्रस्य वा मोहस्य, अज्ञानस्य वा नाशो भवेत्। यद्यप्यर्जुनोऽग्रेऽपि प्रक्ष्यति तथापि ज्ञानदीपस्य प्रज्वलनं प्रारम्भमभूत्।

द्वादशस्याध्यायस्य प्रथमं श्लोकं पश्यामः -

---

[9] ०७/०१ तत्रैव

[10] ०८/०१ तत्रैव

[11] ०९/०१ तत्रैव

[12] १०/०१ तत्रैव

[13] ११/०१ तत्रैव

**एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।**

**चे चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥**[14]

अस्य श्लोकस्य वक्ता अर्जुनः। अस्मिन् श्लोके अर्जुन:पृच्छति यद् भगवन् ये भक्ता: त्वामर्थात् साकाररूपं उपासते, ये च अक्षरं ब्रह्म अर्थात् निराकारमुपासते तेषां के उत्तमा योगवेत्तार:? अत्र एतद् ध्यातव्यं उभौ योगवेत्तारौ भवत:परन्तु मार्गस्य सारल्यं काठिन्यं वा भवति। कस्यचिदेकस्य लक्ष्यस्य बहवो मार्गा भवन्ति शिक्षकेण गुरुणा वा शिष्यस्वभावानुसारो मार्गो दर्शनीयः।

त्रयोदशस्याध्यायस्य प्रथमं श्लोकमालोचयाम: -

**इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।**

**एतद्यो वेत्ति तं प्राहु:क्षेत्रज्ञ इति तद्विद:॥**[15]

अस्य श्लोकस्य वक्ता श्रीभगवान्। अस्मिन् श्लोके शरीरं आत्मा च चर्च्यते। शिक्षणे ज्ञातस्य शरीरस्याज्ञातस्य आत्मनश्च द्वयोःशिक्षा आवश्यकम्।

चतुर्दशस्याध्यायस्य प्रथमे श्लोके श्रीभगवान् उवाच -

**परं भूय:प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।**

**यज्ज्ञात्वा मुनय:सर्वे परां सिद्धिमितो गता:॥**[16]

पञ्चदशस्याध्यायस्य प्रथमं श्लोकं पश्यामः -

**ऊर्ध्वमूलमध:शाखमश्वत्थं प्राहुरव्ययम्।**

**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥**[17]

अस्य श्लोकस्य वक्ता श्रीभगवान्। अत्र श्रीभगवान् संसारं वृक्षमिव ज्ञापयति परन्तु तस्य संसाररूपिणो वृक्षस्य मूलमधो न भूत्वा ऊपरि वर्तते। रूपकमाध्यमेन शिक्षा सुगमं भवति। रूपकस्य, दृष्टातस्य, उदाहरणानाञ्च प्रयोगेण शिक्षणं कर्त्तव्यम्।

षोडशस्याध्यायस्य काञ्चन श्लोकान् पश्याम: -

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थिति:।**

**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥**

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**

**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥**

**तेजः क्षमा धृतिः शौचमद्रोहोनातिमानिता।**

**भवन्ति सम्पदं दैवीमभिजातस्य भारत॥**[18]

---

[14] १२/०१ तत्रैव

[15] १३/०१ तत्रैव

[16] १४/०१ तत्रैव

[17] १५/०१ तत्रैव

[18] १६/०१-०३ तत्रैव

IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429 Volume 5, Issue 5, December 2025 Impact Factor: 7.67

एषु श्लोकेषु श्रीभगवान् चतुर्विंशतीर्गुणान् वर्णयति। श्रीभगवान् उवाच हे अर्जुन! त्वं दैव्या सम्पदा युक्तोऽसि तस्माद् तवाकल्याणं कदाचित् न भविष्यति। एतद् अत्यन्तमावश्यकं यद् गुरु:शिक्षको वा शिष्यं छात्रं वा सामर्थ्यबोधं कारयेत् । यदा गुरु:शिष्यस्य दैवीगुणं प्रशंसति तदा शिष्यस्य गुणा उत्तरोत्तरं वर्धन्ते।

सप्तदशस्याध्यायस्य प्रथमं श्लोकं पश्याम: -

**ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः।**

**तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः॥**[19]

अस्य श्लोकस्य वक्ता अर्जुन:। अस्मिन् श्लोके पृष्टःप्रश्नो वर्तमानकाले बहु प्रासङ्गिको यतो हि पूजनादिषु प्रायःसर्वे श्रद्धायुक्तास्तु भवन्ति परन्तु शास्त्रविधिं न जानन्ति। वस्तुतःप्रश्नोऽर्जुनस्य कृते नास्ति, अस्माकं कृते वर्तते।

अष्टादशस्याध्यायस्य प्रथमःश्लोको अर्जुनस्य वर्तते -

**सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।**

**त्यागस्य च हृषीकेश पृथक्केशिनिषूदन॥** [20]

इदानीमन्तिमस्याध्यायस्य काञ्चन अन्त्यान् श्लोकान् आलोचयाम: -

शिष्येणोपदेशस्य अभिप्रायो गृहीतो न वेति श्रीभगवान् पृच्छति यतो ह्युपदेशार्थमुपदेशो न भवति शिष्यशिक्षणायोपदेशो भवति। शिष्यश्छात्रो वैकाग्रेण श्रुतं न वैतदपि शिक्षकेण ज्ञातव्यं भवति। यदि शिष्येण छात्रेण वाभिप्रायोऽगृहीत:स्यात् तर्हि अन्येन विधिना ज्ञापयेत्। पाठस्यान्ते अवश्यं शिक्षकेण प्रष्टव्यः

तव प्रश्न उत्तरितः?

**कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।**

**कच्चिदज्ञानसम्मोह:प्रनष्टस्ते धनञ्जय॥**

**अर्जुन उवाच**

**नष्टो मोह:स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।**

**स्थितोऽस्मि गतसन्देह: करिष्ये वचनं तव ॥**[21]

अर्जुनस्य पूर्वं स्थितिरासीत् -**सीदन्ति मम गात्राणि , भ्रमतीव च मे मन:, शोकसंविग्नमानस:॥** अधुना अर्जुन: कथयति गतसन्देहो , नष्टमोहोऽस्मि । हे ! अच्युत तव वचनं पालयिष्यामि। शिक्षायाःसाफल्यं एतदेव भवति यद् शिष्यश्छात्रो वा गुरुवचनं कर्त्तुम् उद्यतो भवेत् यतो हि गुरुवचनपालने एव शिष्याणां छात्राणां वा कल्याणं वर्तते।

अन्तिमे सञ्जय उवाच महात्मनःश्रीकृष्णस्यार्जुनस्य चेमं संवादं श्रुत्वा धन्योऽस्मि। भगवतो रूपं संस्मृत्य संस्मृत्य हृष्यामि।

**राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।**

**केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः॥**[22]

---

[19] १७/०१ तत्रैव

[20] १८/०१ तत्रैव

[21] १८/७२-७३ तत्रैव

IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429 Volume 5, Issue 5, December 2025 Impact Factor: 7.67

गुरो:शिष्याच्च समाजस्यापेक्षा भवति यदनयोर्गुरुशिष्योर्संवादेन समाजे किं परिवर्त्तनं भविष्यति? सञ्जय आश्वासयति यत्र योगेश्वर:श्रीकृष्णोऽर्थात् योग्यो गुरुः, अर्जुनोऽर्थात् जिज्ञासुः, समर्पितशिष्योऽस्ति तत्र निश्चयेन श्रीः, विजय:, विभूतिर्भविष्यति -

**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।**

**तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥**[23]

**सन्दर्भग्रन्थ सूची**

1. श्रीमद्भगवद्गीता महर्षिवेदव्यासः, स्वामी रामदेवः, प्रकाशकः, हरिद्वारम्, दिव्यप्रकाशनम् प्रकाशनवर्षं संवत् 2075।
2. श्रीमद्भगवद्गीता शाङ्करभाष्यम्, आचार्य: शङ्करः/श्रीहरिकृष्णदास गोयन्दका, प्रकाशक:- गोरखपुर, गीताप्रेस, प्रकाशनवर्षं संवत् 2074।
3. कर्मयोग का तत्त्व ,जयदयाल गोयन्दका, प्रकाशकः,गोरखपुर, गीताप्रेस, प्रकाशनवर्षं संवत् 2075।
4. महाभारतम्, वेदव्यासः/सातवलेकर दामोदरः, स्वाध्याय भवनम्, पारडी महाराष्ट्रः, 1969 सन्।
5. अष्टाध्यायी, पण्डित ब्रह्मदत्तः जिज्ञासुः, रामलाल कपूर ट्रस्ट, हरियाणा, 2009 सन्।

[22] १७/७६ तत्रैव

[23] १८/७८